# Shrikrishna Sahasranamastotram

# શ્રીકૃષ્ણસહસ્રનામસ્તોત્રમ્

## Document Information

Text title : Shrikrishna Sahasranama Stotram

File name : shrIkRRiShNasahasranAmastotram.itx

Category : vishhnu, sahasranAma, krishna

Location : doc_vishhnu

Proofread by : Mohan Chettoor

Description/comments : See corresponding nAmAvaliH

Latest update : January 2, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 29, 2023

*sanskritdocuments.org*

# શ્રીકૃષ્ણસહસ્રનામસ્તોત્રમ્

ૐ શ્રી કૃષ્ણાય પરમાત્મને નમઃ ।

ધ્યાનં -

અનન્તનામકં કૃષ્ણં કૃપાવર્ષં કૃપાર્ણવમ્ ।
ભક્ત્યા નામસહસ્રેણ સ્તોતુમિચ્છામિ સર્વદા ॥ ૧॥

શ્રી કૃષ્ણચન્દ્ર! સર્વેશ! સ્રવ્યરૂપ! સ્તુતિપ્રિય ।
વેણુગોપાલ! રાધેશ! સ્તોતું ત્વાં દેહિ મે વરમ્ ॥ ૨॥

પ્રેમાર્પિતમનોબુદ્ધિં, દેહિ મે કરુણાનિધે! ।
નીલસુન્દરરૂપસ્ય, દેહિ મે દિવ્યદર્શનમ્ ॥ ૩॥

અથ શ્રીકૃષ્ણસહસ્રનામસ્તોત્રં પ્રારભ્યતે ।

હરિઃ ૐ -

ૐ રાધિકેશં જગન્નાથં મોહનં વનમાલિનમ્ ।
નન્દસૂનું મહાવિષ્ણું મુકુન્દં મધુસૂદનમ્ ॥ ૧॥

દેવકીનન્દનં શ્યામં વાસુદેવં જગન્મયમ્ ।
યશોદાતનયં કૃષ્ણં કુણ્ડલદ્વયભૂષણમ્ ॥ ૨॥

અમ્બુજાક્ષં કૃપાપૂર્ણં વેણુવાદનસુન્દરમ્ ।
નીલવર્ણં ઘનશ્યામં નવનીરદસન્નિભમ્ ॥ ૩॥

વિશાલફાલં સુમુખં સુન્દરદ્યુતિપૂરિતમ્ ।
શ્યામસુન્દરગોપાલં લીલામાનુષવિગ્રહમ્ ॥ ૪॥

ગોપીનાથં ચિત્તચોરં સૂર્યકોટિસમપ્રભમ્ ।
રાસેશ્વરં રાસલોલં રાસમણ્ડલવર્ત્તિનમ્ ॥ ૫॥

ગોપિમણ્ડલમદ્ધ્યસ્થં નૃત્તકેલિરસપ્રદમ્ ।
કારુણ્યામૃતનેત્રં ચ મહનીયગુણાન્વિતમ્ ॥ ૬॥

સુન્દરાઙ્ગં ચારુરૂપમિન્દીવરનિભાનનમ્ ।
નીલપ્રભં કમ્બુકણ્ઠં કૌસ્તુભદ્યુતિશોભિતમ્ ॥ ૭॥

નીલવર્ણકપોલાભં કસ્તૂરીતિલકાન્વિતમ્ ।
ચન્દનાલિપ્તગાત્રં ચ વક્ષઃસ્થલસુશોભનમ્ ॥ ૮॥

માનિનીમાનદં શ્રીદં વન્યમાલાવિભૂષિતમ્ ।
રાસરમ્યં કોમલાઙ્ગં પ્રેમલીલાપરં જિતમ્ ॥ ૯॥

કામદર્પહરં કાન્તં વેણુગાનવિશારદમ્ ।
કામદં કામજનકં કામવર્જિતમાનસમ્ ॥ ૧૦॥

પીતામ્બરધરં સૌમ્યમાનન્દરસવર્ધકમ્ ।
રૂપલાવણ્યસારં ચ વેણુવાદનતત્પરમ્ ॥ ૧૧॥

કોમલાઙ્ઘ્રિસરોજાભં શિઞ્જન્નૂપુરસુન્દરમ્ ।
ભક્તહૃદ્પદ્મનિલયં સર્વમઙ્ગલકારકમ્ ॥ ૧૨॥

નૃત્તકેલિરસાનન્દં ગોપીચિત્રપ્રમોદકમ્ ।
સર્વાઙ્ગસુન્દરં નીલં વિકસન્મુખપઙ્કજમ્ ॥ ૧૩॥

ચારુનેત્રં ચારુવર્ણં ચારુચન્દ્રાનનપ્રભમ્ ।
ચન્દ્રાવલીસુપૂજ્યં ચ નૃત્તમણ્ડલમદ્ધ્યગમ્ ॥ ૧૪॥

વેણુજૂષ્ટમુખામ્ભોજં રમણીયાનનપ્રભમ્ ।
અત્યન્તકોમલં શ્યામસુન્દરં રૂપમોહનમ્ ॥ ૧૫॥

મઞ્જીરશિઞ્જિતં નાદં નાનારસવિવર્ધકમ્ ।
રઙ્ગરઙ્ગવિશેષાભં વિવિધસ્વરનાદનમ્ ॥ ૧૬॥

વિશાલાક્ષં વિશ્વવન્દ્યં વેણુનાદરસપ્રિયમ્ ।
મઞ્જીરચરણં ભવ્યં મણિનૂપુરશિઞ્જિતમ્ ॥ ૧૭॥

અમ્ભોરુહસમાનાભં સર્વસૌન્દર્યસારદમ્ ।
શ્યામલાઙ્ગપ્રભાપૂર્ણં દિવ્યકોમલવિગ્રહમ્ ॥ ૧૮॥

મધુરપ્રેમસારં ચ કૃષ્ણાખ્યં જગદીશ્વરમ્ ।
રાધેશં રાધિકાવન્દ્યં ગોપિકાપ્રેમવર્ધકમ્ ॥ ૧૯॥

વૃન્દારણ્યવિહારં ચ યમુનાપુલિનેશ્વરમ્ ।
ગોવૃન્દચારિણં ગોપં ગોપબાલસમાવૃતમ્ ॥ ૨૦॥

લીલાનરં કેલિસક્તં કરુણારસવત્સલમ્ ।
કુબ્જાનુકુબ્જસુક્રીડં પાદવિન્યાસશોભિતમ્ ॥ ૨૧॥

વનમાલાશોભિતાઙ્ગં દિવ્યગાત્રપ્રભોજ્જ્વલમ્ ।
દિવ્યગન્ધાનુલિપ્તં ચ શ્રીવત્સાઙ્કિતવક્ષસમ્ ॥ ૨૨॥

ગાનલોલં રસોન્મત્તં નવનીતરસપ્રિયમ્ ।
ગોપીમાનસચોરં ચ દિવ્યશોભાતિભાસુરમ્ ॥ ૨૩॥

દિવ્યનૃત્તરસોલ્લાસં કામમોહનસુન્દરમ્ ।
કુટિલાલકબર્હાભં રત્નકિઙ્કિણિભૂષિતમ્ ॥ ૨૪॥

સૌન્દર્યોદયસૂક્ષ્માઙ્ગં સુસ્મેરવદનામ્બુજમ્ ।
અલિવૃન્દાકર્ષણં ચ વનમાલાવિભૂષિતમ્ ॥ ૨૫॥

અતુલપ્રેમસારં શ્રી રાધિકાપ્રેમસાગરમ્ ।
નટનાકૃતિરમ્યં ચ દિવ્યપ્રેમરસામૃતમ્ ॥ ૨૬॥

સુજાતં સુપ્રિયં સૂક્ષ્મં મનોમન્દિરવાસિનમ્ ।
સ્વયંજ્યોતિઃશ્યામવર્ણં શારદેન્દુનિભાનનમ્ ॥ ૨૭॥

ચરાચર જગન્નાથં જગદ્વન્દ્યં જગદ્ગુરુમ્ ।
પ્રણતક્લેશનાશં ચ ભક્તમાનસરઞ્જનમ્ ॥ ૨૮॥

રાધેશ્વરં રસક્રીડં કલવેણુસુકૂચિતમ્ ।
કરીન્દ્રપૂજિતં મૂલં કરિવીરવરપ્રદમ્ ॥ ૨૯॥

જિતકામં જિતક્રોધં કલિકલ્મષનાશનમ્ ।
રામાનુજં હૃષીકેશં વેણુગોપાલસુન્દરમ્ ॥ ૩૦॥

ફણાર્ત્તિદં બાલકૃષ્ણં ફણિદર્પવિનાશકમ્ ।
ગન્ધર્વાપ્સરસાં પૂજ્યં સુરવૃન્દનિષેવિતમ્ ॥ ૩૧॥

કલાદિનાથં સમ્પૂર્ણં સઙ્ગીતરસલોલુપમ્ ।
વ્રજનારીસમાકૃષ્ટં મણિકઙ્કણભૂષિતમ્ ॥ ૩૨॥

નન્દગોપસદાનન્દં યશોદાનન્દસાગરમ્ ।
સર્વલોકૈકવન્દ્યં ચ નિત્યનિર્મલમાનુષમ્ ॥ ૩૩॥

ચન્દ્રાનનં ચારુહાસં ચારુચન્દનચર્ચિતમ્ ।

ભક્તપ્રિયં ભક્તપૂજ્યં ભક્તિગમ્યં ભયાપહમ્ ॥ ૩૪॥

સચ્ચિન્મયં સત્સ્વરૂપં સર્વસઙ્ગવિવર્જિતમ્ ।
સર્વારમ્ભનિદાનં ચિદાનન્દામૃતપૂરિતમ્ ॥ ૩૫॥

લીલાધૃતગિરિશ્રેષ્ઠં ઇન્દ્રદર્પહરં શમમ્ ।
આબાલવૃન્દસમ્પૂજ્યં સુરધેનુસુપૂજિતમ્ ॥ ૩૬॥

સર્વાભીષ્ટપ્રદાતારં કાલિયાહિવિમર્દકમ્ ।
ગીતકીર્ત્તિવિશેષં ચ નીલવર્ણવરાનનમ્ ॥ ૩૭॥

સત્યવ્રતં સચ્ચરિતં સચ્ચિદાનન્દવિગ્રહમ્ ।
ગોવૃન્દાનુચરં પૂજ્યં ગોપબાલાગ્રગામિનમ્ ॥ ૩૮॥

સુચારુનટનં રમ્યં સર્વસારં સુખોદયમ્ ।
ઉલૂખલનિબદ્ધં ચ સર્વબન્ધવિમોચકમ્ ॥ ૩૯॥

પુષ્પસૌન્દર્યલોલં ચ પુષ્પગન્ધાનુસેવિતમ્ ।
રાજીવચરણં નાનાવનરાજિનિષેવિતમ્ ॥ ૪૦॥

નિસ્તુલં નિર્મમં શાન્તં નિરાલમ્બં નિરાશયમ્ ।
આનન્દાબ્ધિં દયાસિન્ધું વરેણ્યં વરદં વિભુમ્ ॥ ૪૧॥

વૃન્દાવનેશ્વરં શ્રેષ્ઠં પ્રેમાનન્દવિવર્ષણમ્ ।
નિત્યમુક્તસ્વરૂપં ચ નિત્યાનન્દવરપદમ્ ॥ ૪૨॥

અખિલેશમમેયં ચ સત્યં ત્રિભુવનેશ્વરમ્ ।
ચિદાકાશસ્થિતં સર્વચિત્તગૂઢનિવાસિનમ્ ॥ ૪૩॥

પદ્મપત્રવિશાલાક્ષં બર્હાલઙ્કૃતકુન્તલમ્ ।
સુન્દરભ્રૂવિલાસં ચ બિમ્બાધરસુમોહનમ્ ॥ ૪૪॥

ધૃતવેણું ગાનરમ્યં નૃત્તસુન્દરમાનુષમ્ ।
સ્વરરૂપં નાદરૂપં શબ્દબ્રહ્મામૃતં સુખમ્ ॥ ૪૫॥

નાનારત્નાલઙ્કૃતાઙ્ગં સુન્દરાલકસંવૃતમ્ ।
ગોપનારીચિત્તચોરં કૃષ્ણં ગોપાલસુન્દરમ્ ॥ ૪૬॥

પુણ્યગન્ધાતિદિવ્યાઙ્ગં દિવ્યાભાપરિપૂરિતમ્ ।
લમ્બમાલાવિલસિતં વન્દનીયમમાનુષમ્ ॥ ૪૭॥

પરાનન્દં પરાસેવ્યં પદ્મકેસરસુન્દરમ્ ।
સરોજદલનેત્રાભં વન્દિતં વનચારિણમ્ ॥ ૪૮॥

પુરુષં શાશ્વતં સૂક્ષ્મં નિગૂઢં પુરુષોત્તમમ્ ।
હૃદયસ્થં ગુહાવાસં સર્વભૂતનિકેતનમ્ ॥ ૪૯॥

સર્વભૂતાન્તરાત્માનં નરં નારાયણં પરમ્ ।
સર્વભૂતાધિવાસં ચ સર્વભૂતહૃદિસ્થિતમ્ ॥ ૫૦॥

અચ્યુતાનન્દગોવિન્દં કૃષ્ણં ગોપાલવિગ્રહમ્ ।
દિવ્યાનન્દં નિજાનન્દં ગોપીમાનસમોહનમ્ ॥ ૫૧॥

યશોદાનન્દનં જિષ્ણું દેવકીગર્ભસમ્ભવમ્ ।
શ્યામકોમલગોપાલં વસુદેવપ્રિયાત્મજમ્ ॥ ૫૨॥

ગોપગોપીસદાસેવ્યં યમુનાપુલિનેચરમ્ ।
ગોપનારીજનપ્રેષ્ઠં ચઞ્ચલેક્ષણસુન્દરમ્ ॥ ૫૩॥

દિવ્યજ્યોતિઃસ્વરૂપં ચિદાનન્દરસરૂપિણમ્ ।
આત્માનન્દં પરાનન્દં ચિદેકરસપૂરિતમ્ ॥ ૫૪॥

પ્રેમાનન્દં સુખાનન્દં કરુણારસસાગરમ્ ।
પવિત્રં પરમાનન્દં શ્યામલાભાપ્રપૂરિતમ્ ॥ ૫૫॥

રાધાપ્રેમસુધાસારં પ્રેમમાધુર્યવર્ષણમ્ ।
નાટ્યનર્ત્તનહૃદ્યં ચ નટનાકૃતિસુન્દરમ્ ॥ ૫૬॥

કરવેણુરવાનન્દં પાદપાંસુસુમઙ્ગલમ્ ।
સુચારુચરણં કર્ણપીયૂષસ્વરનાદનમ્ ॥ ૫૭॥

નીલપ્રભાપૂર્ણગાત્રં નીલદ્યુતિ સમાવૃતમ્ ।
નીલામ્બુદઘનશ્યામં પ્રેમાસ્વાદનલોલુપમ્ ॥ ૫૮॥

પ્રેમમાનસસમ્પૂજ્યં મનોમન્દિરવાસિનમ્ ।
ભક્તિરૂપં ભક્તસેવ્યં ભક્તમાનસપૂજિતમ્ ॥ ૫૯॥

ગોકુલેશ્વરસર્વેશં ગોપરાજકુમારકમ્ ।
ધેનુવૃન્દાનુગમનં વ્રજગોપાલબાલકમ્ ॥ ૬૦॥

જન્મમૃત્યુવિનિર્મુક્તં નાનાલીલાવતારકમ્ ।
યશોદાનન્દપુત્રાખ્યં નરજન્મવિનોદકમ્ ॥ ૬૧॥

માતૃપ્રેમપયઃપ્રીતં રાધિકાપ્રેમલોલુપમ્ ।
ક્રીડન્તં નન્દગેહસ્થં બાલગોપાલવિગ્રહમ્ ॥ ૬૨॥

પૂતનાઘાતકં સર્વજીવચિત્તપ્રશામકમ્ ।
બાલક્રીડાસમાસક્તં યશોદાપ્રિયવત્સલમ્ ॥ ૬૩॥

ગોવત્સવૃન્દાનુચરં ગોવૃન્દાન્વેષણોત્સુકમ્ ।
વેણુગાનરસોલ્લાસં ગોપકન્યાપ્રસાદકમ્ ॥ ૬૪॥

વનમાલાલઙ્કૃતાઙ્ગં રત્નકઙ્કણભૂષિતમ્ ।
તમાલસુન્દરશ્યામં કરવેણુસુશોભનમ્ ॥ ૬૫॥

ફણીન્દ્રમર્દનાક્રીડં સહસ્રફણમર્દકમ્ ।
ફણરત્નદ્યુતિવ્યાપ્તપાદપઙ્કજશોભિતમ્ ॥ ૬૬॥

નૃત્તલીલાવિશેષાભં કાલિયાર્ત્તિવિનાશકમ્ ।
સુગીતકીર્ત્તિસમ્પૂજ્યં પુણ્યશ્રવણકીર્ત્તનમ્ ॥ ૬૭॥

ગોપાલાખ્યં દૈત્યકાલં શકટાસુરભઞ્જનમ્ ।
ગોવર્ધનાચલોદ્ધારં ગોપગોવૃન્દસૌખ્યદમ્ ॥ ૬૮॥

યશોદાનન્દદાતારં નિતાન્તસુખદાયકમ્ ।
શ્રીધરં શ્રીમુખામ્ભોજં રાધામાધવસુન્દરમ્ ॥ ૬૯॥

તૃણાવર્ત્તમતિક્રાન્તં યમલાર્જુનભઞ્જનમ્ ।
દામોદરં દામબદ્ધં વ્રજનારીજનપ્રિયમ્ ॥ ૭૦॥

નિરઞ્જનં નિત્યશુદ્ધં નિત્યાનન્દસુખાસ્પદમ્ ।
નારાયણમનાદ્યન્તં નિરપેક્ષં નિજાશ્રિતમ્ ॥ ૭૧॥

કૃતનાનાવતારં ચ લીલાગોપાલવિગ્રહમ્ ।
નાનાયોનિસમાસીનં બ્રહ્મયોનિમયોનિજમ્ ॥ ૭૨॥

ગોપરાજં નરશ્રેષ્ઠં નૃત્તગોપાલસુન્દરમ્ ।
વેણુગોપાલબાલં ચ નન્દગોકુલનાયકમ્ ॥ ૭૩॥

અઙ્ગલાવણ્યસમ્પૂર્ણં યશોદાપ્રીતિભાજનમ્ ।
રાધાપ્રેમરસાનન્દં પ્રોન્મુખં હ્લાદિનીપ્રિયમ્ ॥ ૭૪॥

ચન્દનાલિપ્તનીલાઙ્ગં મહોરસ્કં સુમાલિનમ્ ।

ગોપિકાપ્રેમસૌભાગ્યં પ્રેમચોરં સુખાશ્રયમ્ ॥ ૭૫॥

અપારમહિમાનં ચ પ્રોજ્જ્વલં મૂલકારણમ્ ।
અભીષ્ટવરદાતારમપ્રમેયમગોચરમ્ ॥ ૭૬॥

કિઙ્કિણીજાલવીતાઙ્ગં પીતકૌશેયવાસસમ્ ।
નીલવર્ણવિશેષાભં તટિદ્વર્ણામ્બરપ્રભમ્ ॥ ૭૭॥

કૌસ્તુભદ્યુતિસંવ્યાપ્તં કર્ણાભરણભૂષિતમ્ ।
નીલસ્ફટિકતુલ્યાભં પૂર્ણચન્દ્રપ્રભાનનમ્ ॥ ૭૮॥

આલોલકુણ્ડલદ્વન્દ્વં અચ્છસ્ફટિકનિર્મલમ્ ।
જગન્મોહનલાવણ્યં કૃતપુણ્યવરપ્રદમ્ ॥ ૭૯॥

અતીન્દ્રિયમનોવાચં નિખિલં ચેતસામ્પરમ્ ।
ચરાચરાત્મકં વ્યક્તં સર્વજીવસમાશ્રયમ્ ॥ ૮૦॥

નિત્યજ્ઞાનં નિરુપમં ગીતાધર્મપ્રબોધકમ્ ।
સંસારસાગરોત્તારં કરુણારસસાગરમ્ ॥ ૮૧॥

વન્યભોજ્યરસાનન્દં ગોપબાલકનાયકમ્ ।
ખગવૃન્દસમાકર્ષં મલ્લિકાકુસુમપ્રિયમ્ ॥ ૮૨॥

નાનાલતાકૃષ્ટચિત્તં પુષ્પસૌન્દર્યલાલસમ્ ।
વૃક્ષમૂલસુખાસીનં શીતલચ્છાયયાવૃતમ્ ॥ ૮૩॥

ફલમાધુર્યલોલં ચ સર્વકર્મફલપ્રદમ્ ।
ધેનુકાસુરસંહારં તાલપક્વફલાશનમ્ ॥ ૮૪॥

મલ્લવીરવિજેતારં મલ્લવિદ્યાવિશારદમ્ ।
કંસમુક્તિપ્રદાતારં હસ્તિવીરપ્રપીડનમ્ ॥ ૮૫॥

સત્યધર્મપરિત્રાણં મર્ત્ત્યધર્મપ્રબોધકમ્ ।
ચોરાગ્રગણ્યગોપાલં પાપચોરં કૃપાકરમ્ ॥ ૮૬॥

અન્તર્બહિઃસ્થિતં વિશ્વં સ્થૂલસૂક્ષ્મં ચ કારણમ્ ।
વ્યક્તાવ્યક્તસ્વરૂપં ચ પરમાત્મપ્રકાશકમ્ ॥ ૮૭॥

કેશવં કમલાનાથં સુકેશં કેશિસૂદનમ્ ।
નિત્યનિર્મુક્તમેકં ચ નિસ્તુલં નિરતિક્રમમ્ ॥ ૮૮॥

ગિરિરાજધરં બાલં દેવેન્દ્રમખભઞ્જનમ્ ।
વર્ષધારાપ્રશમનં પ્રેમધારાવિવર્ષણમ્ ॥ ૮૯॥

કામધેનુપયસ્સિક્તં ગોવિન્દં ગિરિગોચરમ્ ।
હૃતદર્પેન્દ્રસમ્પૂજ્યં ગોકુલપ્રીતિવર્ધનમ્ ॥ ૯૦॥

બ્રહ્માણ્ડકોટિગર્ભસ્થં મૃદ્ભક્ષકમનામયમ્ ।
મુખાન્તઃસ્થત્રિભુવનં યશોદાદ્ભુતદર્શનમ્ ॥ ૯૧॥

સનાતનં નિત્યસત્યમમરં સુરનાયકમ્ ।
નિરવદ્યં નિષ્પ્રપઞ્ચં પ્રપઞ્ચં નિખિલેશ્વરમ્ ॥ ૯૨॥

યદુશ્રેષ્ઠં રમાનાથં કૃષ્ણં પ્રાણાધિકપ્રિયમ્ ।
રાધાનન્દં સદાનન્દં બાલગોપં યદૂત્તમમ્ ॥ ૯૩॥

પાર્થિવં પૃથિવીનાથં મૃદુલં પાર્થસારથિમ્ ।
બકારિમઘસંહારં બ્રહ્મદેવનમસ્કૃતમ્ ॥ ૯૪॥

બાલવેષં વત્સરૂપં ધેનુરૂપં શિશું પ્રિયમ્ ।
કૃતનાનારૂપરમ્યં બ્રહ્મમોહનિવારણમ્ ॥ ૯૫॥

દૈવસમ્પત્તિદાતારં મુચુકુન્દપ્રસાદકમ્ ।
અસુરઘ્નં શિષ્ટપાલં સુસ્મૃતં શોકનાશનમ્ ॥ ૯૬॥

ગજેન્દ્રસંસ્તુતં સ્તવ્યં હસ્તિહસ્તપ્રપૂજિતમ્ ।
આદિમૂલં સર્વમૂલં નિર્મૂલં વિશ્વમૂલકમ્ ॥ ૯૭॥

અક્રૂરવરદં પૂજ્યં વૈકુણ્ઠનિલયં શ્રુતમ્ ।
જલાન્તર્નિલયં ચારુદર્શનં સુખદર્શનમ્ ॥ ૯૮॥

પ્રેમોન્મુખમનઃપ્રેષ્ઠં પ્રેમપીયૂષસાગરમ્ ।
રાધિકાપ્રેમરાજ્યં ચ પ્રેમાનન્દવિધાયકમ્ ॥ ૯૯॥

કૃષ્ણચન્દ્રં યાદવેન્દ્રં યદુરાજકુમારકમ્ ।
યમુનાતીરસઞ્ચારં જલક્રીડારતં ચરમ્ ॥ ૧૦૦॥

ગોપિકારમણં રાજં રસિકં રસિકેશ્વરમ્ ।
રસિકોન્મત્તં રસોલ્લાસં તુલસીદામશોભિતમ્ ॥ ૧૦૧॥ (રસોન્મત્તં)

કર્ણાનન્દં રસાનન્દં સર્વેન્દ્રિયસુખપ્રદમ્ ।
મનોવાક્કર્મજેતારં ચિત્તગં ચિત્તરઞ્જનમ્ ॥ ૧૦૨॥

અનિમિત્તં તુલ્યહીનં ચિદ્ભવં ભવનાશનમ્ ।
અમોઘમમરશ્રેષ્ઠં કૃષ્ણં નિસ્તુલવિક્રમમ્ ॥ ૧૦૩॥

દૈવસમ્પદ્વિધાતારં વરાહાદિસ્વરૂપિણમ્ ।
મત્સ્યરૂપં કૂર્મરૂપં ભાર્ગવં ભરતાગ્રજમ્ ॥ ૧૦૪॥

હલાયુધં બાલરામં વારુણીમદવિહ્વલમ્ ।
યમુનાકર્ષણં વીરં સુપ્રીતિરસવર્ધનમ્ ॥ ૧૦૫॥

અસુરશ્રેષ્ઠસંહારં નૃસિંહં ભયહારિણમ્ ।
હરિં પ્રહ્લાદવરદં સર્વલોકસુખાવહમ્ ॥ ૧૦૬॥

કૃષ્ણં કપટગોપાલં કમનીયં વરાનનમ્ ।
સુકુમારં સુસ્મિતાભં સુન્દરં સુકલેવરમ્ ॥ ૧૦૭॥

નાદાન્તં બિન્દુરૂપં ચ ગુણરૂપં કલાત્મકમ્ ।
આદિરૂપં કલારૂપં ચતુર્વર્ગાત્મકં સ્વરમ્ ॥ ૧૦૮॥

વેણુગાનં રમ્યનાદં ક્લીઙ્કારં વૈખરીરવમ્ ।
કલાપૂર્ણં કલાતીતં ઓઙ્કારનિનદં કલમ્ ॥ ૧૦૯॥

આદિનાથં બીજરૂપં ગીતામૃતકલામૃતમ્ ।
સ્વરામૃતં શબ્દસારં ભાવરૂપં કૃપામૃતમ્ ॥ ૧૧૦॥

સુગુણં કાલસઙ્કલ્પં ગુણાતીતં ગુણોત્ભવમ્ ।
સદસત્સર્વરૂપં ચ શબ્દબ્રહ્માદિકં ભવમ્ ॥ ૧૧૧॥

હૈયઙ્ગવાશનાસક્તં મિષ્ટાન્નસુખલોલુપમ્ ।
સુસ્વાદુરસલોલં ચ ગોપિકાપ્રેમભાજનમ્ ॥ ૧૧૨॥

બાલકેલિરસોન્મત્તં નવકેલિરસપ્રિયમ્ ।
અચલં નિશ્ચલં શુદ્ધં ચપલં ચઞ્ચલં ચલમ્ ॥ ૧૧૩॥

ચિદાકાશં ચિદાદિત્યં ચિત્પ્રસન્નં ચિદાત્મકમ્ ।
ચિત્તાકાશં ચિત્પ્રકાશં ચિજ્જ્યોતિશ્ચેતનામૃતમ્ ॥ ૧૧૪॥

ગોપિકાપ્રેમકામં ચ રાધિકાહૃદયેશ્વરમ્ ।
નિત્યકામં નિકામં ચ કામસઙ્કલ્પવર્જિતમ્ ॥ ૧૧૫॥

જીવામૃતં કૃપાલું ચ સૌમ્યરૂપં દયાપરમ્ ।

શાન્તિદં શાન્તશીલં ચ શમિનં કરુણાકરમ્ ॥ ૧૧૬॥

વેણુસઞ્જુષ્ટરમ્યાઙ્ગં અધરામૃતશોભનમ્ ।
તુલસીદલમાલાભં નૂપુરદ્વયભૂષણમ્ ॥ ૧૧૭॥

પરઞ્જ્યોતિઃ પરન્ધામ પરમાણું પરાત્પરમ્ ।
અણીયાંસં મહીયાંસં સ્થૂલસૂક્ષ્માદિમૂલકમ્ ॥ ૧૧૮॥

કર્માદ્ધ્યક્ષં કર્મહીનં કર્માતીતમકર્મકમ્ ।
સકર્મકં નિષ્ક્રિયં ચ કર્મગં કર્મમોચકમ્ ॥ ૧૧૯॥

સજ્જનાભીષ્ટદં શિષ્ટં ધેનુકાસુરમર્દનમ્ ।
વ્રજબાલં પ્રીતિરૂપં કૃષ્ણમાત્મસખં ગુરુમ્ ॥ ૧૨૦॥

પ્રલમ્બવધકામં ચ બલરામાનુજં બલમ્ ।
પૂતનાપ્રાણહર્તારં હલાયુધગદાયુધમ્ ॥ ૧૨૧॥

મનોબુદ્ધીન્દ્રિયપ્રાણં પ્રજ્ઞાનં પરમં ફલમ્ ।
જ્ઞાનદં જ્ઞાનગમ્યં ચ વિજ્ઞાનાનન્દમણ્ડલમ્ ॥ ૧૨૨॥

શ્રીકૃષ્ણં જગદદ્ધ્યક્ષં રાધિકાપ્રાણવલ્લભમ્ ।
સર્વેન્દ્રિયપ્રાણધર્મં સર્વગં સર્વકર્ષણમ્ ॥ ૧૨૩॥

સુશીલં રાજગોપાલં શીતલં શ્યામલપ્રભમ્ ।
ધૃતવાદ્યં શબ્દસારં ગાયકં કીર્ત્તિદાયકમ્ ॥ ૧૨૪॥

ગોવર્ધનાદ્રિસઞ્ચારં તૃણાન્વેષણતત્પરમ્ ।
ગોવત્સાનનુધાવન્તં ગોધનં ગોપરિગ્રહમ્ ॥ ૧૨૫॥

મર્ક્કટપ્લવનોદ્યુક્તં બાલકં કેલિલાલસમ્ ।
તમાલનીલં સુશ્યામં કારુણ્યદ્રુતમાનસમ્ ॥ ૧૨૬॥

અમોઘદર્શનં પ્રીતં પરિપાવનકીર્ત્તિદમ્ ।
રસં સારં સર્વસારં રસસારસુધામયમ્ ॥ ૧૨૭॥

મયૂરસમનૃત્તં ચ બર્હાભાવૃતકુન્તલમ્ ।
હંસનૃત્તં હંસગતિં કોકિલારવકૂજિતમ્ ॥ ૧૨૮॥

પદ્મનાભં પદ્મનેત્રં પદ્માભં પદ્મજાર્ચિતમ્ ।
નીલપદ્મસમાનાભં પાદપદ્મસુપૂજિતમ્ ॥ ૧૨૯॥

દિવ્યાઙ્ગં દિવ્યનટનં દિવ્યપ્રેમપ્રહર્ષણમ્ ।
દિવ્યાભાપૂરિતાઙ્ગં ચ દિવ્યભાવનિવેશનમ્ ॥ ૧૩૦॥

કૃતકૃત્યં કર્મહેતું સાક્ષિણં કર્મનિષ્કૃતિમ્ ।
સન્નિકર્ષં વિદૂરં ચ કૂટસ્થં કપટાકૃતિમ્ ॥ ૧૩૧॥

સત્વયોનિં સઙ્ગહીનં સાધુપૂજ્યં સુમાનસમ્ ।
સત્વશુદ્ધં સત્યરૂપં સત્વાકારં સદાશુભમ્ ॥ ૧૩૨॥

શ્રીકૃષ્ણં ગોકુલપ્રેષ્ઠં વૃન્દારણ્યનિવાસિનમ્ ।
વન્યજીવિસમાકૃષ્ટં મર્કટાદ્યનુકારિણમ્ ॥ ૧૩૩॥

કોકિલાનનુકૂજન્તં શબ્દઘોષરસપ્રિયમ્ ।
ક્રીડોન્મત્તં ચારુનૃત્તમાદધન્તં નરનાયકમ્ ॥ ૧૩૪॥

લીલાકૃતિં સુનૃતં ચ સકલં સન્નુતં શિવમ્ ।
હેમાઙ્ગિનીપ્રિયં નાથં નિર્વૈરં પદ્મમાલિનમ્ ॥ ૧૩૫॥

મણિકણ્ઠં હંસરૂપં વૈકુણ્ઠં પક્ષિવાહનમ્ ।
હંસાધિરૂઢં લક્ષ્મીશં જયં ચ વિજયં શુચિ ॥ ૧૩૬॥

સુદર્શનં યોગિપૂજ્યં યોગેશં ચ યુગેશ્વરમ્ ।
યોગેશ્વરં યોગગમ્યં કૃષ્ણં યોગેશ્વરેશ્વરમ્ ॥ ૧૩૭॥

આદિમદ્ધ્યાન્તસંવ્યાપ્તં કાલાન્તં યુગસમ્ભવમ્ ।
યોગમાર્ગપ્રણેતારં સુકૃતં બ્રહ્મચારિણમ્ ॥ ૧૩૮॥

કામકોટિવિજેતારમાનકદુન્દુભિપ્રિયમ્ ।
પ્રેમસૂત્રનિબદ્ધં ચ ભવબન્ધવિમોચકમ્ ॥ ૧૩૯॥

ગીતાચાર્યં કાલરૂપં વિશ્વરૂપપ્રદર્શકમ્ ।
જ્ઞાનવિજ્ઞાનરૂપં ચ મધુરપ્રેમભાષણમ્ ॥ ૧૪૦॥

ઋતુરાજં વસન્તાભં શરદ્વન્દ્યં પ્રવર્ષણમ્ ।
ગ્રીષ્મવેગં ચ હેમન્તં શિશિરં શિશુસન્નિભમ્ ॥ ૧૪૧॥

મયૂરકુક્કુટસખં મેઘગર્જનઘોષણમ્ ।
મેઘનાદં મેઘનિભં મયૂરપ્રિયકારિણમ્ ॥ ૧૪૨॥

કાલિન્દીસલિલોન્મજ્જં કેયૂરાદ્યૈરલઙ્કૃતમ્ ।
હસ્તતાડનસુક્રીડં ગોપકન્યાપ્રપૂજિતમ્ ॥ ૧૪૩॥

કાત્ત્યાયનીનુતં કીર્ત્તિં કાત્ત્યાયન્યર્ચિતં શ્રિયમ્ ।
ઇષ્ટદેવં પૂજનીયં પ્રાર્ત્થિતં ચ પતિં પ્રભુમ્ ॥ ૧૪૪॥

કન્યાર્ચિતં કામવરમકામં કામનાશનમ્ ।
સમ્મોહનં વરિષ્ટં ચ કામિનીકામદં જિતમ્ ॥ ૧૪૫॥

જિતમોહં કામરૂપં મોહિનીવેષધારિણમ્ ।
જિતદૈત્યં દેવદૂતં દેવકાર્યસુરક્ષકમ્ ॥ ૧૪૬॥

પ્રેમામૃતં ચિદમૃતં જ્ઞાનામૃતવિવર્ષણમ્ ।
નિર્મોહં નિસ્પૃહં યુક્તં નિરાસક્તં નિજાશયમ્ ॥ ૧૪૭॥

ભૂતં ભૂતાદિકં ભવ્યં નિર્દોષં દોષવર્જિતમ્ ।
નિરીહં નન્દપુત્રં ચ યશોદાનન્દવર્ધનમ્ ॥ ૧૪૮॥

ભવોન્મુખં ભવાતીતં ભવિષ્યન્તં ભવાશ્રિતમ્ ।
ભવમોહવિનિર્મુક્તં નિર્ભવં ભવરૂપિણમ્ ॥ ૧૪૯॥

તૈજસં જ્યોતિરાદિત્યં પ્રકાશં તેજસામ્પતિમ્ ।
જ્યોતિર્મુખં ચ ચિજ્જ્યોતિર્ભાસ્કરં રવિમણ્ડલમ્ ॥ ૧૫૦॥

ચન્દ્રપ્રભં મેઘનીલમનન્તકિરણોદ્ભવમ્ ।
દિવ્યાકાશં નીલજાલમાનીલં નીલવર્ષણમ્ ॥ ૧૫૧॥

નીલાર્ણવં નીલનીલં સુનીલં નીલસુન્દરમ્ ।
નીલં ચ નીલસર્વાઙ્ગં નીલારમ્ભં સુનીલકમ્ ॥ ૧૫૨॥

કામારિં કામવેગં ચ સર્વકામવરં સ્મરમ્ ।
કંસારિં કાલકાલં ચ કંસસૌભાગ્યપૂરકમ્ ॥ ૧૫૩॥

દ્વારકાધિપતિં શ્રીશં રુક્મિણીસહિતં શ્રિયમ્ ।
જગદીશં પાર્ત્થસખં સત્યભામારતં પતિમ્ ॥ ૧૫૪॥

સર્વલોકકુટુમ્બસ્થં પ્રેમસામ્રાજ્યનાયકમ્ ।
ષોડશસ્ત્રીસહસ્રેશં માનિનીમાનસપ્રિયમ્ ॥ ૧૫૫॥

પયોધિવાસિનં કૃષ્ણં પયચ્ચોરં પયોનિધિમ્ ।
રાધાપ્રેમપયઃપ્રીતં પ્રેમપાયસલોલુપમ્ ॥ ૧૫૬॥

પ્રણવં પ્રણવાવન્તઃસ્થં નાદબિન્દુકલાદિકમ્ ।

નાદાન્તઃસ્થં નાદસૂક્ષ્મં બિન્દું નાદસુમઙ્ગલમ્ ॥ ૧૫૭॥

ઓઙ્કારં સ્વરસમ્પુષ્ટં ક્લીન્નાદં સ્વરસંયુતમ્ ।
સ્વરરાગસુધાસેવ્યં વૈખરીરવકૂજનમ્ ॥ ૧૫૮॥

ભાવયુક્તં ભાવવેગં ભાવપૂર્ણં ભવચ્છિદમ્ ।
ભાવોજ્જ્વલં ભાવરૂપં ભવવેગવિમોચકમ્ ॥ ૧૫૯॥

ભવોત્તારં ભગવતં ભવમોક્ષં ભવેતરમ્ ।
ભવોપેતં ભવાન્તઃસ્થં ભજનીયં પરાઙ્મુખમ્ ॥ ૧૬૦॥

અનિષ્ટમિષ્ટં સમ્પુષ્ટં સુસ્વરં કલકૂજનમ્ ।
રાસક્રીડાસમાસક્તં ગોપિકાપ્રેષ્ઠનાયકમ્ ॥ ૧૬૧॥

પ્રજ્ઞાનં સુપ્રધાનં ચ પ્રકટં પુરુષેશ્વરમ્ ।
વિરજસ્કં સત્વપૂર્ણં મનોનિલયમદ્ભુતમ્ ॥ ૧૬૨॥

વાચામગોચરં વ્યક્તનજનિં જન્મનાશનમ્ ।
મર્ત્યં મૃત્યુવિહીનં ચ નૃરૂપં યાદવોત્ભવમ્ ॥ ૧૬૩॥

અરણ્યવાસં યોગેન્દ્રમભિવન્દ્યં સુદર્શનમ્ ।
આત્માભિધં શ્રુતિસ્તુત્યં કૂટસ્થં કૂટપૂરુષમ્ ॥ ૧૬૪॥

દિગ્વિલાસં દૈવિકં ચ દેવકાર્યવરપ્રદમ્ ।
ઉપેન્દ્રં હૃદયાન્તઃસ્થં વામનં દાનવાર્ચિતમ્ ॥ ૧૬૫॥

બલિદર્પહરં હ્રસ્વં યજ્ઞવાટસમાગતમ્ ।
ત્રિપદં ભુવનવ્યાપ્તં વિપ્રં કપટભાષિણમ્ ॥ ૧૬૬॥

ત્રિપદાક્રાન્તભુવનં વિક્રમં ચ ત્રિવિક્રમમ્ ।
અહમ્મમાદિહન્તારં વટુવામનરૂપિણમ્ ॥ ૧૬૭॥

બ્રહ્મ બ્રહ્મમયં વિષ્ણું બ્રહ્માખ્યં જગદીશ્વરમ્ ।
શિવં શિવકરં શુદ્ધં માર્ક્ણ્ડેયવરપ્રદમ્ ॥ ૧૬૮॥

માયાતીતં માયિનં ચ માયાશ્રિતમમાયકમ્ ।
નિત્યમુક્તસ્વભાવં ચ માયાગુણવિવર્જિતમ્ ॥ ૧૬૯॥

માયાગુણં નિમાયં ચ માયેશં ત્રિગુણાત્મકમ્ ।
ત્રિમૂર્ત્તિં ત્રિગુણોદ્ભૂતં માયાસઙ્ગવિમોચકમ્ ॥ ૧૭૦॥

આનન્દં ચ પ્રમોદં ચ મઙ્ગલં સર્વમઙ્ગલમ્ ।
સૂક્ષ્માદિસૂક્ષ્મં પ્રકટં સૂક્ષ્મતત્ત્વં ચ સૂક્ષ્મગમ્ ॥ ૧૭૧॥

શ્રીકૃષ્ણચન્દ્રં શ્રીનાથં રાધાપ્રેમાધિકપ્રિયમ્ ।
શ્રીવત્સાઙ્કં શ્રીનિકેતં વ્રજનારીવિમોહનમ્ ॥ ૧૭૨॥

શ્યામલં કોમલં વન્દે, યદુનાથં યદૂત્તમમ્ ।
સુન્દરં વેણુગોપાલં ચિન્મયં સુમનોહરમ્ ॥ ૧૭૩॥

હૃદયસ્થં સદા વન્દે, વન્દે પ્રેમપયોનિધિમ્ ।
કૃષ્ણં વન્દે પ્રિયાત્માનં, વન્દે રાધેશસુન્દરમ્ ॥ ૧૭૪॥

ઇતિ સ્વામિ ઈશ્વરાનન્દસરસ્વતી વિરચિતં
શ્રી શ્રીકૃષ્ણસહસ્રનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

મઙ્ગલં વેણુગોપાલ! મઙ્ગલં પુરુષોત્તમ ।
મઙ્ગલં ચારુસર્વાઙ્ગ! મઙ્ગલં હૃદયેશ્વર ॥

Proofread by Mohan Chettoor

*Shrikrishna Sahasranamastotram*

pdf was typeset on June 29, 2023

Please send corrections to *sanskrit@cheerful.com*